Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 3, Issue - 4, July-Aug – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 11/08/2020 Accepted on : 24/08/2020 Publication Date: 31/08/2020

भाषाणां जननी संस्कृतम्

डॉ. घनश्याम भट्टः
प्रवक्ता-संस्कृतम्, रा इ का बेडगांवः, ताडीखेतः, अल्मोडा, उत्तराखण्डः भारतम्
Email – gsbhatt_india@hotmail.com

सारः संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। अद्यापि विश्वस्मिन् जगति वा भारतस्य प्रतिष्ठाकारणे द्वे एव- संस्कृतभाषा, अस्य देशस्य संस्कृतिश्च। उच्यते यथा-- भारतस्य प्रतिष्ठे द्वे, संस्कृतं संस्कृतिस्तथा ।

महापुरुषैः शिष्टपुरुषैरमननशीलैर्वा विद्वद्भिर्व्यवहृवता भाषा संस्कृतभाषोच्यते । एवं संस्कृतभाषायाः महत्त्वं स्वयं संस्कृत! शब्द एवं व्यनक्ति, यतः सर्वमेव संस्कृतवस्तु श्रेष्ठं महत्त्वपूर्णञ्च भवति। सम् पूर्वकात् "डुकृञ् करणे" धातोः क्त प्रत्यये कृते संस्कृतशब्दो निष्पद्यते यस्यार्थों भवति परिष्कृतो दोषरहितः: शुद्धों वा।

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति।-[1] यथार्थरूपेणैव संस्कृतं दिव्या अलौकिकी अमूल्या च भाषा वर्तते यस्याः अन्वाख्यानम् महर्षिभिः कृतम्। इयम् तु न कापि सामान्या भाषा यस्याः उपयोगः स्वविचाराणामभिव्यक्तये एव क्रियते। एषा तु सा भाषा यत्र अस्माकम् महर्षीणाम्, ऋषीणाम् मुनीनाम् च समग्रं चिन्तनं निहितं वर्तते। अद्यापि विश्वस्मिन् जगति वा भारतस्य प्रतिष्ठाकारणे द्वे एव- संस्कृतभाषा, अस्य देशस्य संस्कृतिश्च। उच्यते यथा-- भारतस्य प्रतिष्ठे द्वे, संस्कृतं संस्कृतिस्तथा ।

महापुरुषैः शिष्टपुरुषैरमननशीलैर्वा विद्वद्भिर्व्यवहृवता भाषा संस्कृतभाषोच्यते । एवं संस्कृतभाषायाः महत्त्वं स्वयं संस्कृत! शब्द एवं व्यनक्ति, यतः सर्वमेव संस्कृतवस्तु श्रेष्ठं महत्त्वपूर्णञ्च भवति। सम् पूर्वकात् "डुकृञ् करणे" धातोः क्त प्रत्यये कृते संस्कृतशब्दो निष्पद्यते यस्यार्थों भवति परिष्कृतो दोषरहितः: शुद्धों वा। यथोक्तमपि-"यत् परिष्कृतं तदेव संस्कृतम्" इति। अतः संस्कारप्रदानेन संस्कृत भाषायाः उपादेयता अनादिकालात् प्रचलिता| उक्तमपि-

अमृतं मधुरं सम्यक्,संस्कृतं हि ततोऽधिकम्|
देवभोग्यमिदं यस्मात्, देवभाषेति कीर्त्यते||

सुरवाणी, देववाणी, अमरभारती, अमरवाणी, संस्कृतावाक्, दैवीवाक्, गीर्वाणवाणी, सुरभारती, देवभाषा प्रभृतिनामभिर्लोके विख्यातेयं संस्कृतभाषा। इयं भाषा संसारस्य सर्वासां भाषाणां जननी इति सर्वेषामेव भाषाविज्ञानविदुषाम् निर्विवादों विषयः| संस्कृतभाषा भारतस्यापूर्वो निधिः। सुविशालं साहित्यमुपलभ्यतेऽस्यां भाषायाम्। उक्तं हि-

मूलमेकं भाषाणां भारतीयानां हि संस्कृतम्।
मूललोपे च शाखेव सा सर्वा शोषमेष्यति।।

अस्याः भाषायाः व्याकरणं सर्वाङ्गपूर्णं, शब्दकोषो5प्रतिमः, लिपिश्च वैज्ञानिकी। संस्कृतभाषायाः व्याकरणन्तु सर्वथा अद्वितीयं स्वरूपतो विज्ञानमेव, अस्य निदर्शनस्तु सुविदितं सुस्पष्टञ्च, यथा-अन्यासु भाषासु यल्लिख्यते न तत्तथा पठयते किन्तु देववाण्यां यल्लिख्यते तदेव पठयते। यथा- आङ्ग्लभाषायां **'son'** या **'sun'** अनयोः उच्चारणं समानमेव भवति किन्तु वर्तन्यां भेदः अस्ति संस्कृते तथा न भवति| संस्कृत भाषायाम् आकृति-ध्वन्योर्मध्ये वाक्-अर्थयोर्मध्ये च अविनाभावसंबन्धः भवति| महा कविना कालिदासेनापि उक्तं रघुवंशमहाकाव्ये-वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ -[2]

संस्कृतस्य द्वे रूपे स्तः- वैदिकं लौकिकञ्च | संस्कृतस्य वैदिक रूपं प्राचीनतमम् | तद्रूपं वयं ऋग्गवेदे प्राप्नुमः।

संस्कृतस्य लौकिक रूपं वाल्मीकिरामायणम् इति ग्रंथात् प्रारभते। लौकिकसंस्कृतम् प्रसिद्धेन वैयाकरणेन पाणिनिना व्याकरणनियमैः आबध्य नियंत्रितं कृतम्। अद्यत्वेलौकिकसंस्कृतभाषायाः व्याकरणनियमबद्धं रूपमेव सर्वत्र दृश्यते। संस्कृतभाषा व्याकरणनियमबद्धतया अन्यासां भारतीयभाषाणाम् अनुशासिका भूत्वा मार्गदर्शनं करोति | तासां साहित्यम्, शब्दभण्डारः, वर्णनरीतयः संस्कृतेन प्रभाविताः सन्ति | संस्कृतस्य प्रभावेण अन्यासु भारतीयभाषासु ध्वनिस्तरे, रूपस्तरे, वाक्यस्तरे अर्थस्तरे च परिवर्तनं भवति। तेन संस्कृतस्य वैज्ञानिकता स्पष्टीमवति |

सूचनाप्रौद्योगिकीप्रधाने युगेऽस्मिन् संगणकयंत्रस्य कृते संस्कृतभाषा अत्यन्तं महत्त्वपूर्णा वैज्ञानिकी च अस्ति | यतः संस्कृतवाक्येषु शब्दानां विभक्तियुक्तं संश्लिष्टस्वरूपं संगणकयंत्राय

श्रेष्ठं सिद्धमस्ति | नासा शोधकर्तृणामनुसारेण 'आर्टिफिशियल इंटेलिजेंस' सदृषाणां विषमक्षेत्राणां कृते सर्वोत्कृष्टा भाषा संस्कृत भाषा एव अस्ति| संस्था एषा अन्तरिक्षकार्यक्रमस्य कृते अपि संस्कृतं एव विशुद्ध-यान्त्रिकभाषा रूपेण स्वीकरोति| -[3] संस्कृतम् न केवलं भारतीय-भाषा, न केवलं विश्व-भाषा अपितु ब्रह्माण्डीया भाषा अस्ति| 'भारतीय भाषा प्रौद्योगिकी प्रसरण एवं-विस्तारण-केंद्र'अनया संस्थया संस्कृत भाषायाः कृते नैकाः संगणकीय-संशाधनानां आविष्कारं कृतं अस्ति- **http://tdil-dc.in/** जे-एन-यु-संस्कृत-विभागेन अपि उत्तमं योगदानं कृतम् अस्ति- **http://sanskrit.jnu.ac.in/,** अनेन एव प्रकारेण अनेकाः अंतर्जालीय-संसाधनानि सन्ति यत्र शब्दानां संधिच्छेदं, विग्रहं, शब्दकोशादिकं ज्ञातुं शक्नुमः यथा- **http://enjoylearningsanskrit.com/**

http://sanskrit.samskrutam.com/ | प्रोफ़ेसर मदन मोहन झा महोदयेनापि नैकाः संस्कृतशिक्षणे-पठने वा उपकारकाः संस्कृत-एप्लिकेशन इत्ययानां निर्माणं कृतम्| -[4]

प्राचीनशिलालेखेषु बहवः अभिलेखाः संस्कृतभाषायाम् एव उत्कीर्णाः सन्ति| तत्र कारणं किम्? बहुकालपर्यन्तं भारतस्य राज्येषु संस्कृतस्य प्रयोगः राजभाषारूपेण प्राचलत् | ज्योतिष-गणितविषयेषु बीजगणित-ज्यामितिकग्रंथाः संस्कृतभाषायां सन्ति |

पालि-प्राकृत-अपभ्रंशानाम् उद्भवः

अनन्तरं संस्कृतस्य आधारं गृहीत्वा पालिभाषा विकसिता संजाता। बौद्धधर्मस्य ग्रन्थाः

जातकग्रंथाः इति नाम्ना प्रसिद्धाः पालिभाषायां रचिताः आसन्। पालिभाषायाः अनन्तरम् प्राकृतभाषायाः उदभवः संजातः| अशोकस्य शिलालेखेषु प्राकृतभाषायाः प्रयोगः उपलभ्यते | प्राकृतभाषायाः प्रयोगः अश्वघोषस्य नाटकेषु अपि प्राप्यते। प्राकृतभाषा अपि शनैः-शनैः व्याकरणनियमेषु आबद्धा। कालान्तरे लोकव्यवहारकारणात् तत्र किमपि परिवर्तनं जातम्। पश्चात् सा सरला लोकभाषा जाता, यस्याः लोकव्यवहारे प्रयोगो भवति।

प्राकृतभाषायां यदा व्याकरणविरुद्धप्रयोगाणां प्रचलनं जातं तदा तस्याम् अपभ्रंशानां प्रयोगः अधिकतया अभवत् | अपभ्रंशभाषाऽपि कालान्तरे व्याकरणनियमैः आबबद्धा।

अपभ्रंशस्य शौरसेनी-मागधी-अर्धमागधी-महाराष्ट्री-पैशाची- ब्राचड़ इति भेदाः सञ्जाताः। आधुनिक-भारतीयभाषाणाम् उद्भवः एताभ्यः अपभ्रंशभाषाभ्यः एव मन्यते। आधुनिकभारतीयभाषासु हिन्दी-ब्रजभाषा-गुजराती-राजस्थानी-हरियाणवी-पंजाबी-कन्नौजी-अवधी- हिमाचली- कश्मीरी-डोगरी-पहाड़ी एतासां भाषाणाम् उद्भवः शौरसेनी-अपभ्रंशात् संजातः | मागधीअपगभ्रंशात् बिहारी- असमी-उड़िया- मैथिली- मगही- भोजपुरी- संथाली -बघेली-छत्तीसगढ़ी- नेपाली- मणिपुरी- बोडो इत्यादयः भाषाः समुद्भूताः | महाराष्ट्री-अपभ्रंशात् उद्भूताः भाषाः सन्ति, मराठी-कोंकणी इति। पैशाची-अपभ्रंशात्-लहंदा (पश्चिमी पंजाबी), ब्राचड़ अपभ्रंशात् च सिंधी भाषा उदभूता। -[5] एतासु सर्वासु भाषासु संस्कृतस्य महान् प्रभावः विद्यते। तासु संस्कृतशब्दानां प्रयोगः बहुलतया वर्तते। कतिपयाः शब्दाः अत्र दीयन्ते |

द्रविडभाषापरिवारस्य तमिल-तेलुगु-कननड-मलयालम आदिभाषाणाम् आर्यपरिवारस्य भाषया सह मुख्यतया संस्कृतेन सह बहुशताब्दिभ्यः सम्यक् विद्यते। मलयालम तु संस्कृतशब्दबहुला एव अस्ति।

संस्कृतम्	तमिल	मलयालम	तेलुगु
अभिनयः	अविनयम्	अविनयम्	अभिनयमु
निश्चयः	निच्चयम्	निश्चयम्	निश्चयमु

केचन् संस्कृतशब्दाः तमिल-तेलुगु-कन्नड-मलयालम-बाङ्ला-उडिया-हिन्दी-गुजराती-मराठी-मैथिली -असमिया आदिभाषासु प्रायः किंचिद्रूपभेदेन अथवा यथावत् प्रयुक्ताः भवन्ति | यथा- अंशः, अपमानम्, अंगुलिः, अनुभवः, कायः, ग्रामः, विश्वासः, वृक्ष, शापः, शोकः, श्वासः,

रक्तम्, अन्नम्, परलोकः, विवादः, जीवनम्, गानम्, मूलम्,, अवस्था, इच्छा, लज्जा,प्रतिनिधि, पत्नी, शिशुः, ज्ञानी, परस्परं, नूतनं। हिन्दीभाषायां संस्कृतस्य तत्समशब्दानां तद्भवरूपस्य च प्रयोगः दृश्यते | यथा- आश्चर्यम् (अचरज), काष्ठः (काठ), कर्ण (कान), उष्ट्र (ऊंट), अग्नि (आग), उच्च (ऊंचा)।|

इयं संस्कृतभाषा विश्वभाषासु सर्वप्राचीना भाषा। लोकेऽस्मिन ग्रेञ्च्, ग्रीक्, लैटन्, रष्यन् इत्यादीनां भाषाणामपेक्षया संस्कृतस्यैव प्रचीनत्वं भाषाशास्त्रविदोऽङ्गीचक्रुः। मेसापोटामिया-ईजिप्ट-चैनादिदेशेषु संस्कृतिः यदा नाङ्कुरिताः तस्मात्प्रागेव भारतदेशे विज्ञानमयाः अपौरुषेयाः वेदाः महर्षिणां दिव्यदृष्टितः आविर्भूतः|

प्राचीनकालात् एव भारतस्य भाषा-ज्ञानं ग्रीक- इटलीभाषयोः अधिकं श्रेष्ठं तथा वैज्ञानिकं च आसीत् । भारतस्य वैय्याकरणाः एव तान् यूरोपीय- भाषावैज्ञानिकान् शब्द विश्लेषणकलायाः ज्ञानं प्रदत्तवान् |

अङ्ग्रेजी साहित्यस्य इतिहासः **1350**तः चासर-रचित 'केन्टरबरी टेल्स' पुस्तकेन सह आरम्भ भवति| इदं पुस्तकं **'Father of English Poetry '** नाम्ना ज्ञायते। विश्वे भाषाः शब्दार्थयोः सादृष्याधारेण कतिपय गोत्रेषु विभक्ताः| तेषु भारोपीय (**Indo-European)** गोत्रः प्रमुखः | अस्य परिवारस्य केन्तुं वर्गः शतं वर्गश्चेति प्रमुखौ द्वौ विभागौ| ग्रीक-लाटिन-इटालियन-फ्रेन्ज-गोथिक-जर्मन-आङ्ग्ल प्रभृतयोः समागच्छन्ति प्रथम विभागे| संस्कृतम्-अवेस्ता-पारसी-रूस प्रभृतिभाषाः द्वितीय भागे सन्ति| विश्वभाषासमुदाये संस्कृतं विभिन्न कारणैः अग्रिम स्थाने तिष्ठति| यतः प्रचीन भाषासु विद्यमान भाषावैषिष्ट्यानि संस्कृत भाषायां सुरक्षितानि सन्ति|

अत्र विश्रुत भाषाशास्त्रकाराणां संस्कृतभाषासंबन्धिविचाराः अस्याः गौरवं प्रदर्शयन्ति |-

"भाषाणां भाषा संस्कृत भाषा |ज्योतिष्शास्त्रस्य गणितमिव भाषाशास्त्रस्य संस्कृतं प्रधानम्" |

- फ्रेड्रिक मेक्समुल्लरः

"संस्कृतस्य निर्मितिरद्भुता ग्रीक भाषा पेक्षया अत्यन्तं लोपरहिता परिपूर्णा च, लाटिनपेक्षया विस्तृता | द्वाभ्यामपि ताभ्यां निर्मला संस्कृत भाषा"|-[6] - सर् विलियम जोन्स्

" यदि वयं पुरातनीं भारोपियां संस्कृतिं ज्ञातुमिच्छामस्तदा अस्माभिर्भारतं गन्तव्यं, यत्र भारोपीय जातेः 'सर्वपुरातनं साहित्यं सुरक्षितमस्ति"| - विन्टरनिटस्

यद्यपि अधुना विश्वस्य संपर्क भाषा आङ्ग्लभाषया सह संस्कृतस्य काचित् तुलना भवति तथापि संस्कृतस्य वैज्ञानिकतायाः प्रमाणिकतायाः कृते वा कस्यापि आवश्यकता नास्ति| विश्वस्य सर्वाः भाषाः संस्कृतात् एव समुत्पन्ना,सुविकसिताः वा सन्ति| पश्यन्तु यथा-

संस्कृतम्	हिन्दी	अंग्रेजी	फारसी	जर्मन
पितृ	पिता	फादर	पेदर	-
मातृ	माता	मदर	मादर	-
त्रि	तीन	थ्री	-	ट्राई
दुहितृ	दुहिता (बेटी)	डॉटर	दुरव्तर	तोखतर

'मानुष पालित्री' नगर पालिका **'Municipality'**

एतादृशमहत्त्वपूर्णायाम् अस्यां भाषायां पदनिष्पत्तिः अतीव गम्भीरा युक्ति युक्ता च| स्वरेषु ह्रस्व-दीर्घ-प्लुताः इति त्रिधा, पुनः तत्र ह्रस्वस्वरः उदात्त-अनुदात्त-स्वरिताः इति त्रिधा, पुनः ते च उदात्तादयः अनुनासिक-अननुनसिकभेदेन द्विधा भिद्यन्ते| एवमाहत्य एकः अकारः एव संस्कृतभाषायामस्याम् अष्टादशरूपाणि संतनोतीति अहो संस्कृतस्य गम्भीरं वैज्ञानिकत्वम्| तेषामुच्चारणव्यवस्थापि अत्यन्तनिगूढतन्त्रं तत्वञ्चाविष्करोति|

भारतस्य संविधानस्य अष्टमपट्टिकायां द्वाविंशतिभाषासु एषा अन्तर्भवति | [7] 'केन्द्रीय साहित्य अकादमी' इति संस्थायाः आधुनिकभारतीयसाहित्यभाषाणां पट्टिकायामपि संस्कृतमस्ति| एवं चिरपुरातनी अपि नित्यनूतनि इयं भाषा भारतस्य राजभाषा भवतु इति डा. बी. आर. अम्बेडकर महोदयस्य आशयः आसीत्| **310A(1) The official language of the union shall be Sanskrit** इति प्रस्तावे अम्बेडकरः हस्ताक्षरमप्यकरोत्| [8] स्वल्त्रभारते संस्कृतस्य ऐतिहासिक मूहुर्ते संस्कृतविरुद्धं राष्ट्रविरुद्धं च कार्यमाचरितमिति पश्चातकाले विज्ञाय मौर्यमहोदयः राष्ट्रिय-शैक्षिक-अनुसंधान-प्रक्षिषणपरिषदः(**NCERT**) निदेशकाय लिखिते पत्रे (**14-02-2001**) प्रकटितवान् |-[9]

मराठी,बङ्गाली,गुजराती,पञ्जाबी,तमिल्,तेलगु,हिन्दी-इत्यादि भारतीयभाषासु आधुनिक विज्ञानस्य विनिमयनिमित्तं पारिभाषिकशब्दानां निर्माणं चयनं वा कृतः भाषाशास्त्रकारैः, पण्डितैः च| तत्र आर्यभट्ट-भाष्कराचार्य-ब्रह्मगुप्त-चरक-सुश्रुत-वराहमिहिर-चाण्यक्यादिभिः आचार्यैः प्रयुक्ताः शब्दाः एव अधिकाः सन्ति|

संस्कृतं ज्योतिष-संगीत-चिकित्सा-धर्मार्थाचारदण्डराजनीतिविज्ञानादीनां सर्वेषामेव शस्त्राणां मूलम्| संस्कृत-गुणगौरवस्य का कथा, पाश्चात्यदेशाः अपि संस्कृताध्ययने प्रवर्तन्ते| विल्सन महोदयेन सुष्ठु भणितम् –

न जाने वर्तते कीदृङ्माधुर्यमिह संस्कृते|
सर्वदैव समुन्मत्ता येन वैदेशिका वयम्||

इत्थं संस्कृतं न केवलं मातृभाषा अपितु ज्ञान-विज्ञानस्य जननीरपि अस्ति इति सिद्धम्|
अतः संस्कृतस्य अध्ययनं न केवलं विद्यार्थीहिताय अपितु समाजस्य, राष्ट्रस्य विश्वस्य च हिताय परमावश्यकम् | उक्तं हि –

किं भोजनं यत्र न गव्यमस्ति,
का वस्त्रता यत्र न शुभ्रतास्ति |
का सभ्यता यत्र न नम्रता स्यात्,
शिक्षा च का यत्र न संस्कृतं स्यात्||

संदर्भ ग्रंथ सूची:

१ David Fraoly – Devavani-p.13
२ रघुवंश महाकाव्यम्
३ Rick Briggs-Roacs, NASA Ames Research Center, Moffet Field, California
४ अन्तर्जालीय संशाध
५ भाषा विज्ञान-डॉ भोलानाथ तिवारी – पेज-89-206
६ Asiatic Researches vol1.1788 p 422
७ Article 344
८ The Hindu,Statesman,The National Herald-11sept,1949
९ Sanskrit-voice of india's soul and wisdom-p5